# ॥ अघमर्षण सूक्तम् ॥

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः । यन्मया भुक्तं असाधूनां पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् । तन्न इन्द्रो वरुणो बृहस्पति-स्सविता च पुनन्तु पुनः पुनः । नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥

यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात् । अत्याशना-दतीपाना-द्यच्च उग्रात् प्रतिग्रहात् । तन्नो वरुणो राजा पाणिनाह्यवमर्शतु । सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः । नाकस्य पृष्ठं आरुह्य गच्छेत् ब्रह्मसलोकताम् । यश्चाप्सु वरुणस्स पुनात्वघमर्षणः । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि-स्तोमगं सचता परुष्णिया । असिक्निया मरुद्वृधे वितस्तयाऽऽजीकींये श्रुणुह्या सुषोमया । ऋतं च सत्यं चाभीद्धा-त्तपसोऽध्यजायत । ततो रात्रिरजायत तत-स्समुद्रो अर्णवः ॥

समुद्रादर्णवा दधि संवथ्सरो अजायत । अहोरात्राणि विदधत् विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वं अकल्पयत् । दिवं च पृथिवीं चान्तरिक्ष-मथो सुवः । यत्पृथिव्यागं रजस्स्वं आंतरिक्षे विरोदसी । इमाग् स्तदापो वरुणः पुनात्वघमर्षणः । पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः । एष भूतस्य मध्ये भुवनस्य गोप्ता ।

एष पुण्यकृतां लोकानेष मृत्योर् हिरण्मयम् । द्यावापृथिव्योर् हिरण्मयगं सग्ग् श्रितगं सुवः ॥

सन-स्सुव-स्सगंशिशाधि । आर्द्रं ज्वलति ज्योति-रहमस्मि । ज्योतिर्ज्वलति ब्रह्माहं अस्मि । योऽहं अस्मि ब्रह्माहं अस्मि । अहं अस्मि ब्रह्माहं अस्मि । अहमेवाहं मां जुहोमि स्वाहा । अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः । वरुणोऽपामघमर्षणः तस्मात् पापात् प्रमुच्यते । रजोभूमि-स्त्वमागं रोदयस्व प्रवदन्ति धीराः । आक्रान्थ्समुद्रः प्रथमे विधर्मञ्जनयन् प्रजा भुवनस्य राजा । वृषा पवित्रे अधिसानो अव्ये बृहथ्सोमो वावृधे सुवान इन्दुः ॥